# Sri Sita Rama Stavah

# શ્રીસીતારામસ્તવઃ

## Document Information

Text title : sItArAma stavaH

File name : sItArAmastava.itx

Category : devii, puShpAshrIvatsan, sItA, raama, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali

Latest update : February 13, 2022

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

March 8, 2022

*sanskritdocuments.org*

# Sri Sita Rama Stavah

# શ્રીસીતારામસ્તવઃ

ૐ

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ સીતાવરાય વિદ્મહે । ગુરુગેયાય ધીમહિ ।
તન્નો રામઃ પ્રચોદયાત્ ॥

ધ્યાનમ્-
બ્રહ્માણ્ડનાયકં રામં બ્રહ્માશઙ્કરસંસ્તુતમ્ ।
બ્રહ્મજ્ઞાનસમષ્ટિં ચ બ્રહ્માનન્દસ્વરૂપકમ્ ॥ ૧॥

પૂર્ણાયુષ્કારપૂર્ણં તં પૂર્ણસદ્ભક્તિકારકમ્ ।
પૂર્ણસજ્જ્ઞાનસદ્બોધં પૂર્ણત્વરૂપસદ્ગુરુમ્ ॥ ૨॥

ક્ષિત્યાભાસસુતેજસ્કં ક્ષિતિજારમણં હરિમ્ ।
ક્ષિપ્રાપ્રવાહસુશ્લોકં ક્ષિપ્રપ્રસાદદાયકમ્ ॥ ૩॥ (૧)

વન્દેઽહં કરકામ્ભોજં સ્મિતવક્ત્રં સુનેત્રકમ્ ।
પરમાનન્દસદ્રૂપં સીતારામં શુભાકરમ્ ॥ ૪॥

સીતારામં નરોદ્ધારં પરબ્રહ્મસ્વરૂપિણમ્ । (૨)
અભયપ્રદહસ્તાબ્જં સીતારામં નમામ્યહમ્ ॥ ૧॥

પદપલ્લવબાલાર્કં તેજોમયાસ્યવિગ્રહમ્ ।
સ્મિતલોચનકારુણ્યણ્ સીતારામં નમામ્યહમ્ ॥ ૨॥

ત્યાગબ્રહ્મગુરુપ્રેષ્ઠં ગુરુસ્વામિબહુસ્તુતમ્ ।
ગુરુકીર્તનસમ્રાજં સીતારામં નમામ્યહમ્ ॥ ૩॥

સીતાસાધ્વીકલત્રં તં સીતાહૃત્પદ્મવાસનમ્ ।
સીતામિષ્ટસ્વરાવાસં સીતારામં નમામ્યહમ્ ॥ ૪॥

દાશરથ્યતિલાવણ્યં રાઘવં ધર્મસંસ્થિરમ્ ।
પિતૃવાક્પરિપાલં તં સીતારામં નમામ્યહમ્ ॥ ૫॥

સીતાજાનિં ચાપપાણિં લક્ષ્મણાનુજસેવિતમ્ ।
આઞ્જનેયનુતં ધ્યાતં સીતારામં નમામ્યહમ્ ॥ ૬॥

ઘોરરાક્ષસસંહારં ઘોરપાપવિમોચનમ્ ।
ઘોરસંસારતારં તં સીતારામં નમામ્યહમ્ ॥ ૭॥

વાસનાસુરસંહારં કુમનોજગણાપહમ્ ।
પ્રસન્નમાનસાભાસં સીતારામં નમામ્યહમ્ ॥ ૮॥

ધ્યાનતત્પરસંરક્ષં ધ્યાનારિચ્છેદનં હરિમ્ ।
ધ્યાતૃહૃન્નીરખદ્યોતં સીતારામં નમામ્યહમ્ ॥ ૯॥ (૩)

શરણાગતવાત્સલ્યં ગુરુગાનસુપૂજિતમ્ ।
વરસુસ્વરમાધુર્યં સીતારામં નમામ્યહમ્ ॥ ૧૦॥

શરણાર્થ્યભિરક્ષં તં અભયવ્રતપાલનમ્ ।
પરિપાલિતસદ્ભક્તં સીતારામં નમામ્યહમ્ ॥ ૧૧॥

એકવાક્સત્યશીલં સ્વં એકશબ્દનરાકૃતિમ્ ।
એકપત્નીકરાજાનં સીતારામં નમામ્યહમ્ ॥ ૧૨॥

એકાગ્રધ્યાનસંગમ્યં એકાન્તધ્યાતૃગોચરમ્ ।
એકાન્તં એકશબ્દાર્થં સીતારામં નમામ્યહમ્ ॥ ૧૩॥

મન્ત્રતારકનામાનં રૂપતારકનામકમ્ ।
મન્ત્રરાજજપાપાલં સીતારામં નમામ્યહમ્ ॥ ૧૪॥ (૪)

આત્મારામં સ્વરારામં નતભક્તહૃદારમમ્ ।
અભિરામં લયારામં સીતારામં નમામ્યહમ્ ॥ ૧૫॥

શ્રીત્યાગોપનિષત્સારં કીર્તનાસારવર્ષિતમ્ ।
કૃતિગઙ્ગાભિષિક્તં તં સીતારામં નમામ્યહમ્ ॥ ૧૬॥

ત્યાગરાજનુતશ્રેષ્ઠં કૃતિરત્નસુભૂષણમ્ ।
ત્યાગરાજસુવાક્યેલં સીતારામં નમામ્યહમ્ ॥ ૧૭॥

ત્યાગરાજકૃતિપ્રીતં ગુરુકીર્તનસન્નિધિમ્ ।
ભજનાહ્લાદસાન્નિધ્યં સીતારામં નમામ્યહમ્ ॥ ૧૮॥

નાદોપાસનસાનન્દં નાદસુસ્વરસાત્મકમ્ ।
નાદસદ્ગુરુસાત્માનં સીતારામં નમામ્યહમ્ ॥ ૧૯ ॥

ઉપદેશગુરું શ્રીદં રાગદં અનુરાગદમ્ ।
મોક્ષદં શાશ્વતાનન્દં સીતારામં નમામ્યહમ્ ॥ ૨૦ ॥

ત્યાગબ્રહ્મગુરુસ્વામિશિષ્યાપુષ્પાપ્રકીર્તિતમ્ ।
શિશુજલ્પનિભાલાપસ્વીકારં તં નમામ્યહમ્ ॥ ૨૧ ॥

સીતારામનુતિસ્તોત્રં સીતારામકૃપાવહમ્ ।
સદ્ગુરુપ્રેરણાગીતં સીતારામપદાર્પણમ્ ॥ ૨૨ ॥

તવ પાદં ગૃહીતાહં અભયં કુરુ મેઽચ્યુત ।
જ્ઞાતાજ્ઞાતાપરાધાન્મે ક્ષમસ્વ મત્પ્રભો હરે ॥ ૨૩ ॥

મઙ્ગલં રામભદ્રાય સીતારામાય મઙ્ગલમ્ ।
મઙ્ગલં જ્ઞાનમોક્ષાય શ્રીરામાય સુમઙ્ગલમ્ ॥ ૨૪ ॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતઃ
શ્રીસીતારામસ્તવઃ ગુરૌ સમર્પિતઃ ।
ૐ શુભમસ્તુ ।

Footnotes

(૧) ક્ષિપ્રા - Ganga

(૨) સીતા +આરામં - Delight of Sita 33

(૩) The Sun obver the sea of mind of the meditator

(૪) મન્ત્રરાજ - Sri rAma tAraka mantra

Encoded and proofread by N V Vathsan nvvathsan at gmail.com

Copyright Pushpa Srivatsan

*Sri Sita Rama Stavah*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either

the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on March 8, 2022

Please send corrections to *sanskrit@cheerful.com*